# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – वेदः **कोड – C.C.2.3.6** समयः – ३: ००तः ६:००

दिनाङ्कः – ३०-११-२०१६ सन्दर्भग्रन्थः –शुक्लयजुर्वेदसंहित

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्यां लिखत। ०८**

(१) समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्।
आस्मिन्हव्या जुहोतन॥

(२) उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये।
आरे अस्मे च शृण्वते॥

(३) भूर्भुवः स्वः सुप्रजाः प्रजाभिःस्या७ सुवीरो वीरैः सुपोषः पोषैः।
नर्य प्रजां मे पाहि श७स्य पशून्मे पाह्यथर्य पितुं मे पाहि॥

**प्रश्नः – २ आधानमन्त्राणां व्याख्यां महीधरदिशा कुरुत। ०८**

**अथवा**

**उपस्थानमन्त्राणां विवेचनं महत्वं च प्रतिपादयत।**

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत। ०४**

(१) अग्निहोत्रकर्मणि यजमानस्य कर्म (३) अग्निर्मूर्धा दिवः
(२) अध्वरेष्वीड्यः (४) गार्हपत्याग्निः

**प्रश्नः – ४ अधोलिखितेषु पञ्चानाम् अर्थं लिखत। ०५**

(१) हविष्मतीः (४) व्रतपतिः (७) ककुत्पतिः
(२) रोचना (५) वसुः (८) शुक्रम्
(३) रयिम् (६) पतङ्गः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया। ०८**

(१) प्रघासिनो हवामहे मरुतश्च रिशादसः।
करम्भेण सजोषसः॥

(२) भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्।
सुखं मेषाय मेष्यै॥

(३) वय७सोम व्रते तव मनस्तनूषु बिभ्रतः।
प्रजावन्तः सचेमहि॥

**प्रश्नः – ६ वरुणप्रघासस्य कर्मणोऽन्ते तदङ्गभूतम् अवभृथाख्यं कर्मविषये आलोचयत ०८**

**अथवा**

**शुक्लयजुर्वेदस्यवैशिष्ट्यं महत्वं च प्रतिपादयत ।**

**प्रश्नः – ७ एकस्य टिप्पणीं लिखत।** ०२

(१) शिवो नामासि

(२) नाराशंसः

**प्रश्नः – ८ अधोनिर्दिष्टेषु द्वयोः लघूत्तरं यच्छ।** ०२

(१) चातुर्मास्ययागे कति ऋत्विजः ?

(२) शुक्लयजुर्वेदे कति मन्त्राः सन्ति?

(३) उर्वारुकः इत्युक्ते किम्?

(४) 'निचुम्पुण' इति शब्दस्य कोऽर्थः ?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि।

वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि ॥

(२) पुनर्मनः पुनरायुर्म आगन्पुनःप्राण: पुनरात्मा म आगन्पुनश्चक्षुःपुनः श्रोत्रं म आगन्।

वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात्॥

(३) प्रति पन्थामपद्महि स्वस्तिगामनेहसम्।

येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥

**प्रश्नः – १० सोमस्तुतिपरकमन्त्राणां वर्णनं यथाशास्त्रंलिखत।** ०८

**अथवा**

**यजमानस्य कृते प्रयुक्तसंस्कारपरकमन्त्राणां व्याख्यां कुरुत**

**प्रश्नः – ११ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) व्रतं कृणुत (३) षोडशर्त्विजः

(२) सोमक्रयणम् (४) कृष्णाजिनम्

**प्रश्नः – १२ अधोलिखितेषु पञ्चानाम् अर्थं लिखत ।** ०५

(१) रायस्पोष: (४) शर्म (७) अघायवः

(२) इषा (५) मृड (८) परिभूः

(३) कनीनकः (६) ऋतावृधः

***